श्रीमते रामानुजाय नमः

# ॥ मन्त्र पुष्पम् ॥

हरिः ॐ।

अग्निमीळे पुरोहितम् यज्ञस्य देवं ऋत्विजम्। होतारम् रत्नधातमम्।

हरिः ॐ॥

हरिः ॐ।

इषे त्वोर्जे त्वा वायवस्थो पायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे।

हरिः ॐ॥

हरिः ॐ।

अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि।

हरिः ॐ॥

हरिः ॐ।

सन्नो देवीरभिष्टय आपो भवन्तु पीतये। संयोरपिस्रवन्तु नः।

हरिः ॐ॥

ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्। ओमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति। अनपब्रवस्सर्वमायुरेति। विन्दते प्राजापत्यं रायस्पोषं गौपत्यम्। ततोऽमृतत्वमश्नुते ततोऽमृतत्वमष्नुत इति। य येवं वेद। इत्युपनिषत्।

अथ कर्माण्याचाराध्यानि गृह्यन्ते। उधगयन पूर्व पक्षाहः पुण्याहेषु कार्याणि। यज्ञोपवीतिना प्रदक्षिणम्।

इच्छामो हि महाबाहुं रघुवीरं महाबलम्।
गजेन महथाऽयान्तं रामं छत्रावृथाननम्॥

तम् दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम्।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे॥

तासामाविरभूच्छौरिः स्मयमान मुखाम्बुजः।
पीताम्बरधरः स्रग्वी साक्षान् मन्मथ मन्मथः॥

एष नारायण श्रीमान् क्षीरार्णव निकेतनः।
नाग पर्यङ्कम्हृय्स्तृज्य ह्यागतो मधुरां पुरीम्॥

वैकुण्टेतु परे लोके श्रिया सार्द्धम् जगत्पतिः।
आस्ते विष्णुरचिन्त्यात्मा भक्तैः भागवतैस्सह॥

* सेन्रा.ल् कुडैयाम् इरुन्दाल् सिङ्गासनमाम्
निन्रा.ल् मरवडियाम् नीळ्कडलुळ् - एन्रु.म्
पुणैयाम् मणिविळक्काम् पूम्पट्टाम् पुल्गुम्
अणैयाम् तिरुमार्.कु अर.वु

कदा पुन शङ्ख रथाङ्ग कल्पक
द्वजारविन्दाङ्कुश वज्रलाञ्छनम्।
त्रिविक्रम त्वच्चरणाम्बुजद्वयं
मदीयमूर्धानमलङ्करिष्यति॥

अखिल भुवन जन्मस्थेमभङ्गादि लीले

श्रीमते रामानुजाय नमः

विनत विविध भूत व्रात रक्षैक दीक्षे।
श्रुति सिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा॥

श्रीमाधवाङ्घ्रि जलजद्वय नित्यसेवा
प्रेमाविलाशय पराङ्कुश पादभक्तम्।
कामादिदोषहरमात्म पदाश्रितानां
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना॥

**॥ इति मन्त्र पुष्पम् ॥**